कथं विद्यामहं योगिंस्त्वां सदा परिचिन्तयन्।

केषु केषु च भावेषु चिन्त्योऽसि भगवन्मया॥ १०.१७॥

kathaṁ vidyāmahaṁ yogiṁstvāṁ sadā paricintayan |
keṣu keṣu ca bhāveṣu cintyo'si bhagavanmayā || 10.17||

विस्तरेणात्मनो योगं विभूतिं च जनार्दन।

भूयः कथय तृप्तिर्हि शृण्वतो नास्ति मेऽमृतम्॥ १०.१८॥

vistareṇātmano yogaṁ vibhūtiṁ ca janārdana |
bhūyaḥ kathaya tṛptirhi śṛṇvato nāsti me'mṛtam || 10.18||

श्रीभगवानुवाच।

śrībhagavānuvāca |

हन्त ते कथयिष्यामि दिव्या ह्यात्मविभूतयः।

प्राधान्यतः कुरुश्रेष्ठ नास्त्यन्तो विस्तरस्य मे॥ १०.१९॥

hanta te kathayiṣyāmi divyā hyātmavibhūtayaḥ |
prādhānyataḥ kuruśreṣṭha nāstyanto vistarasya me || 10.19||

अहमात्मा गुडाकेश सर्वभूताशयस्थितः।

अहमादिश्च मध्यं च भूतानामन्त एव च॥ १०.२०॥

ahamātmā guḍākeśa sarvabhūtāśayasthitaḥ |
ahamādiśca madhyaṁ ca bhūtānāmanta eva ca || 10.20||

आदित्यानामहं विष्णुर्ज्योतिषां रविरंशुमान्।

मरीचिर्मरुतामस्मि नक्शत्राणामहं शशी॥ १०.२१॥

ādityānāmahaṁ viṣṇurjyotiṣāṁ raviraṁśumān |
marīcirmarutāmasmi nakśatrāṇāmahaṁ śaśī || 10.21||

वेदानां सामवेदोऽस्मि देवानामस्मि वासवः।

इन्द्रियाणां मनश्चास्मि भूतानामस्मि चेतना॥ १०.२२॥

vedānāṁ sāmavedo'smi devānāmasmi vāsavaḥ |
indriyāṇāṁ manaścāsmi bhūtānāmasmi cetanā || 10.22||

रुद्राणां शङ्करश्चास्मि वित्तेशो यक्शरक्शसाम्।

वसूनां पावकश्चास्मि मेरुः शिखरिणामहम्॥ १०.२३॥

rudrāṇāṁ śaṅkaraścāsmi vitteśo yakśarakśasām |
vasūnāṁ pāvakaścāsmi meruḥ śikhariṇāmaham || 10.23||

पुरोधसां च मुख्यं मां विद्धि पार्थ बृहस्पतिम्।

सेनानीनामहं स्कन्दः सरसामस्मि सागरः॥ १०.२४॥

purodhasāṁ ca mukhyaṁ māṁ viddhi pārtha bṛhaspatim |
senānīnāmahaṁ skandaḥ sarasāmasmi sāgaraḥ || 10.24||